

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## द्वितीयकाण्डे प्रथमः प्रश्नः

### पशुविधानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

वायव्यꣳ श्वेतमा लभेत भूतिकामो वायुर् वै क्षेपिष्ठा देवतावायुमेव स्वेन भागधेयेनोप
धावति स एवैनम्भूतिङ्गमयति भवत्येवातिक्षिप्रा देवतेत्याहुः सैनमीश्वरा प्रदह इत्येतमेव सन्त-
वँ्वायवे नियुत्वत आ लभेत नियुद् वा अस्य धृतिर् धृत एव भूतिमुपैत्यप्रदाहाय भवत्येव
॥ [१] ॥ वायवे नियुत्वत आ लभेत ग्रामकामो वायुर् वा इमाः प्रजा नस्योता नेनीयते वायुमेव
नियुत्वन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मै प्रजा नस्योता नि यच्छति ग्राम्येव भवति
नियुत्वते भवति ध्रुवा एवास्मा अनपगाः करोति वायवे नियुत्वत आ लभेत प्रजाकामः प्राणो वै
वायुरपानो नियुत् प्राणापानौ खलु वा एतस्य प्रजाया ॥ [२] ॥ अप क्रामतो योऽलम्प्रजायै
सन् प्रजान्न विन्दते वायुमेव नियुत्वन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मै प्राणापानाभ्यां-
म्प्रजाम्प्र जनयति विन्दते प्रजावँ्वायवे नियुत्वत आ लभेत ज्योगामयावी प्राणो वै वायुरपानो
नियुत् प्राणापानौ खलु वा एतस्मादप क्रामतो यस्य ज्योगामयति वायुमेव नियुत्वन्तꣳ स्वेन
भागधेयेनोप ॥ [३] ॥ धावति स एवास्मिन् प्राणापानौ दधात्युत यदीतासुर् भवति जीवत्येव
प्रजापतिर्वा इदमेक आसीथ् सोऽकामयत प्रजाः पशून्थ् सृजेयेति स आत्मनो वपामुदक्खिदत्
तामग्नौ प्रागृह्णात् ततोऽजस्तूपरः समभवत् तꣳ स्वायै देवताया आऽ*लभत ततो वै स प्रजाः
पशूनसृजत यः प्रजाकामः ॥ [४] ॥ पशुकामः स्याथ् स एतम्प्राजापत्यमजन्तूपरमा लभेत
प्रजापतिमेव स्वेन भागधेयेनोप धावति स एवास्मै प्रजाम्पशून् प्र जनयति यच्छ्मश्रुणस्तत् पुरु-

षाणाꣳ रूपय्ँयत् तूपरस्तदश्वानाय्ँयदन्यतोदन् तद् गवाय्ँयदव्यां इव शफास्तदवीनाय्ँयदजस्त-
दजानामेतावन्तो वै ग्राम्याः पशवस्तान् ॥ [५] ॥ रूपेणैवाव रुन्धे सोमापौष्णन्त्रैतमा लभेत
पशुकामो द्वौ वा अजायै स्तनौ नानैव द्वावभि जायेते ऊर्जम्पुष्टिन्तृतीयः सोमापूषणावेव स्वेन
भागधेयेनोप धावति तावेवास्मै पशून् प्र जनयतः सोमो वै रेतोधाः पूषा पशूनाम्प्रजनयिता सोम
एवास्मै रेतो दधाति पूषा पशून् प्र जनयत्यौदुंबरो यूपो भवत्यूर्वा उदुंबर ऊर्क् पशव ऊर्जैवास्मा
ऊर्जं पशूनव रुन्धे ॥ [६] ॥

(प्रजाकाम स्तान् यूप स्त्रयोदश च) ॥ १ ॥

प्रजापतिः प्रजा असृजत ता अस्माथ् सृष्टाः पराचीरायन् ता वरुणमगच्छन् ता अन्वैत्
ताः पुनरयाचत ता अस्मै न पुनरददाथ् सोऽब्रवीद् वरव्ँवृणीष्वाथ मे पुनर् देहीति तासा-
व्ँवरमाऽ*लभत स कृष्ण एकशितिपादभवद्यो वरुणगृहीतः स्याथ् स एतव्ँवारुणङ्कृष्णमेक-
शितिपादमालभेत वरुण ॥ [७] ॥ मेव स्वेन भागधेयेनोप धावति स एवैनव्ँवरुणपाशान्
मुञ्चति कृष्ण एकशितिपाद् भवति वारुणो ह्येष देवतया समृद्ध्यै सुवर्भानुरासुरः सूर्यन्तम-
साऽविद्ध्यत् तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्य यत् प्रथमन्तमोऽपाघ्नन्थ् सा कृष्णाऽविर-
भवद् यद् द्वितीयꣳ सा फल्गुनी यत् तृतीयꣳ सा बलक्षी यदद्ध्यस्थादपाकृन्तन्थ् साऽविर्
वशा ॥ [८] ॥ समभवत् ते देवा अब्रुवन् देवपशुर् वा अयꣳ समभूत् कस्मा इममा लप्स्या-
मह इत्यथ वै तर्ह्यल्पा पृथिव्यासीदजाता ओषधयस्तामविव्ँवशामादित्येभ्यः कामायाऽलभन्त
ततो वा अप्रथत पृथिव्यजायन्तौषधयो यः कामयेत प्रथेय पशुभिः प्र प्रजया जायेयेति स
एतामविव्ँवशामादित्येभ्यः कामाया ॥ [९] ॥ ऽऽलभेताऽऽदित्यानेव कामꣳ स्वेन भागधे-
येनोपधावति त एवैनम्प्रथयन्ति पशुभिः प्र प्रजया जनयन्त्यसावादित्यो न व्यरोचत तस्मै
देवाः प्रायश्चित्तिमैच्छन् तस्मा एता मल्हा आलभन्ताऽऽ*ग्नेयीङ्कृष्णग्रीवीꣳ सꣳहितामैन्द्रीꣳ
श्वेताम्बार्हस्पत्यान्ताभिरेवास्मिन् रुचमदधुर् यो ब्रह्मवर्चसकामः स्यात् तस्मा एता मल्हा आ
लभेता ॥ [१०] ॥ ऽऽग्नेयीङ्कृष्णग्रीवीꣳ सꣳहितामैन्द्रीꣳ श्वेताम्बार्हस्पत्यामेता एव देवताः
स्वेन भागधेयेनोप धावति ता एवास्मिन् ब्रह्मवर्चसन्दधति ब्रह्मवर्चस्येव भवति वसन्ता प्रात-

राग्नेयीङ्कृष्णग्रीवीमा लभेत ग्रीष्मे मद्ध्यन्दिने सꣳहितामैन्द्रीꣳ शरद्यपराह्णे श्वेतां बार्हस्प-त्यान्त्रीणि वा आदित्यस्य तेजाꣳसि वसन्ता प्रातर् ग्रीष्मे मद्ध्यन्दिने शरद्यपराह्णे यावन्त्येव तेजाꣳसि तान्येवा ॥ [११] ॥ ऽव रुन्धे सँव्वथ्सरम्पर्यालभ्यन्ते सँव्वथ्सरो वै ब्रह्मवर्चसस्य प्रदाता सँव्वथ्सर एवास्मै ब्रह्मवर्चसम्प्र यच्छति ब्रह्मवर्चस्येव भवति गर्भिणयो भवन्तीन्द्रियवैं गर्भ इन्द्रियमेवास्मिन् दधाति सारस्वतीम्मेषीमा लभेत य ईश्वरो वाचो वदितोः सन् वाचन्न वदेद्वाग्वै सरस्वती सरस्वतीमेव स्वेन भागधेयेनोप धावति सैवास्मिन् ॥ [१२] ॥ वाचन्द-धाति प्रवदिता वाचो भवत्यपन्नदती भवति तस्मान् मनुष्याः सर्वाँव्वाचँव्वदन्त्याग्नेयङ्कृष्णग्री-वमा लभेत सौम्यम्बभ्रुञ्ज्योगामयाव्यग्निँर्वा एतस्य शरीरङ्गच्छति सोमꣳ रसो यस्य ज्योगा-मयत्यग्नेरेवास्य शरीरन्निष्क्रीणाति सोमाद् रसमुत यदीतासुर् भवति जीवत्येव सौम्यम्बभ्रुमा लभेताऽऽ*ग्नेयङ्कृष्णग्रीवम्प्रजाकामः सोमो ॥ [१३] ॥ वै रेतोधा अग्निः प्रजानाम्प्रजनयिता सोम एवास्मै रेतो दधात्यग्निः प्रजाम्प्र जनयति विन्दते प्रजामाग्नेयङ्कृष्णग्रीवमा लभेत सौम्यम्ब-भ्रुँय्यो ब्राह्मणो विद्यामनूच्य न विरोचेत यदाग्नेयो भवति तेज एवास्मिन् तेन दधाति यथ् सौम्यो ब्रह्मवर्चसन्तेन कृष्णग्रीव आग्नेयो भवति तम एवास्मादप हन्ति श्वेतो भवति ॥ [१४] ॥ रुच-मेवास्मिन् दधाति बभ्रुः सौम्यो भवति ब्रह्मवर्चसमेवास्मिन् त्विषिन्दधात्याग्नेयं कृष्णग्रीवमा लभेत सौम्यम्बभ्रुमाग्नेयङ्कृष्णग्रीवम्पुरोधायाꣳ स्पर्द्धमान आग्नेयो वै ब्राह्मणः सौम्यो राज-न्योऽभितः सौम्यमाग्नेयौ भवत स्तेजसैव ब्रह्मणोभयतो राष्ट्रम्परि गृह्णात्येकधा समा वृङ्क्ते पुर एनन्दधते ॥ [१५] ॥

(लभेत वरुणं वशौ तामविँव्वशामादित्येभ्यः कामाय मल्हा आ लभेत तान्येव सैवास्मिन्थ् सोमः श्वेतो भवति त्रिचत्वारिꣳशाच्च) ॥ २ ॥

---

देवासुरा एषु लोकेष्वस्पर्द्धन्त स एतँव्विष्णुर् वामनमपश्यत् तꣳ स्वायै देवताया आऽ*लभत ततो वै स इमाँल्लोकानभ्यजयद् वैष्णवँव्वामनमा लभेत स्पर्द्धमानो विष्णुरेव भूत्वेमाँल्लोकानभि जयति विषम आ लभेत विषमा इव हीमे लोकाः समृद्ध्या इन्द्राय मन्युमते मनस्वते ललामम्प्राशृङ्गमा लभेत संग्रामे ॥ [१६] ॥ सय्यँत्त इन्द्रियेण वै मन्युना मनसा

संग्राममञ्जयतीन्द्रमेव मन्युमन्तम्मनस्वन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मिन्निन्द्रि-
यम्मन्युम्मनो दधाति जयति तꣳ संग्राममिन्द्राय मरुत्वते पृश्निसक्थमा लभेत ग्रामकाम
इन्द्रमेव मरुत्वन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मै सजातान् प्र यच्छति ग्राम्येव भवति
यदृषभस्तेनै ॥ [१७] ॥ न्द्रो यत् पृश्निस्तेन मारुतः समृद्ध्यै पश्चात् पृश्निसक्थो भवति
पश्चादन्ववसायिनीमेवास्मै विशङ्करोति सौम्यम्बभ्रुमा लभेतान्नकामः सौम्यँव्वा अन्नꣳ सोममेव
स्वेन भागधेयेनोप धावति स एवास्मा अन्नम्प्रयच्छत्यन्नाद एव भवति बभ्रुर् भवत्येतद् वा
अन्नस्य रूपꣳ समृद्ध्यै सौम्यम्बभ्रुमा लभेत यमलꣳ ॥ [१८] ॥ राज्याय सन्तꣳ राज्यन्नो-
पनमेथ् सौम्यँव्वै राज्यꣳ सोममेव स्वेन भागधेयेनोप धावति स एवास्मै राज्यम्प्रयच्छत्युपैनꣳ
राज्यन्नमति बभ्रुर् भवत्येतद् वै सोमस्य रूपꣳ समृद्ध्या इन्द्राय वृत्रतुरे ललामम्प्राशृङ्गमा लभेत
गतश्रीः प्रतिष्ठाकामः पाप्मानमेव वृत्रन्तीर्त्वा प्रतिष्ठाङ्गच्छतीन्द्रायाभिमातिघ्ने ललामम्प्राशृ-
ङ्गमा ॥ [१९] ॥ लभेत यः पाप्मना गृहीतः स्यात् पाप्मा वा अभिमातिरिन्द्रमेवाभिमातिहनꣳ
स्वेन भागधेयेनोप धावति स एवास्मात् पाप्मानमभिमातिम्प्र णुदत इन्द्राय वज्रिणे ललाम-
म्प्राशृङ्गमा लभेत यमलꣳ राज्याय सन्तꣳ राज्यन्नोपनमेदिन्द्रमेव वज्रिणꣳ स्वेन भागधेयेनोप
धावति स एवास्मै वज्रम्प्र यच्छति स एनँव्वज्रो भूत्वा इन्ध उपैनꣳ राज्यन्नमति ललामः प्राशृङ्गो
भवत्येतद्वै वज्रस्य रूपꣳ समृद्ध्यै ॥ [२०] ॥

(संग्रामेतेनालमभिमातिघ्ने ललामम्प्राशृङ्गमे नं पञ्चदश च) ॥ ३ ॥

असावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्मा एतान्दशर्षभामाऽल-
भन्त तयैवास्मिन् रुचमदधुर् यो ब्रह्मवर्चसकामः स्यात् तस्मा एतान्दशर्षभामाऽलभेतामुमेवा
ऽऽ*दित्यꣳ स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसन्दधाति ब्रह्मवर्चस्येव भवति
वसन्ता प्रातस्त्रीँल्ललामाना लभेत ग्रीष्मे मद्ध्यन्दिने ॥ [२१] ॥ त्रीञ्छितिपृष्ठाञ्छरद्यपराह्णे
त्रीञ्छितिवारान् त्रीणि वा आदित्यस्य तेजाꣳसि वसन्ता प्रातर् ग्रीष्मे मद्ध्यन्दिने शरद्यपराह्णे
यावन्त्येव तेजाꣳसि तान्येवाव रुन्धे त्रयस्त्रय आ लभ्यन्तेऽभिपूर्वमेवास्मिन् तेजो दधाति सँव्व-
थ्सरम्पर्यालभ्यन्ते सँव्वथ्सरो वै ब्रह्मवर्चसस्य प्रदाता सँव्वथ्सर एवास्मै ब्रह्मवर्चसम्प्र यच्छति

ब्रह्मवर्चस्येव भवति सव्ँवत्सरस्य परस्तात् प्राजापत्यङ्कद्रु ॥ [२२] ॥ मा लभेत प्रजापतिः सर्वा देवता देवतास्वेव प्रति तिष्ठति यदि बिभीयाद् दुश्चर्मा भविष्यामीति सोमापौष्णङ् श्याममा लभेत सौम्यो वै देवतया पुरुषः पौष्णाः पशवः स्वयैवास्मै देवतया पशुभिस्त्वचङ्करोति न दुश्चर्मा भवति देवाश्च वै यमश्चास्मिँल्लोकेऽस्पर्द्धन्त स यमो देवानामिन्द्रियव्ँवीर्यमयुवत तद् यमस्य ॥ [२३] ॥ यमत्वन्ते देवा अमन्यन्त यमो वा इदमभूद्यद्वयङ् स्म इति ते प्रजापतिमुपाधावन्थ् स एतौ प्रजापतिरात्मन उक्षवशौ निरमिमीत ते देवा वैष्णावरुणीव्ँवशामाऽलभन्तैन्द्रमुक्षाणं तव्ँवरुणेनैव ग्राहयित्वा विष्णुना यज्ञेन प्राणुदन्तैन्द्रेणैवास्येन्द्रियमवृञ्जत यो भ्रातृव्यवान्थ् स्याथ् स स्पर्द्धमानो वैष्णावरुणी ॥ [२४] ॥ व्ँवशामा लभेतैन्द्रमुक्षाणव्ँवरुणेनैव भ्रातृव्यङ्ग्राहयित्वा विष्णुना यज्ञेन प्र णुदत ऐन्द्रेणैवास्येन्द्रियव्ँवृङ्क्ते भवत्यात्मना परास्य भ्रातृव्यो भवतीन्द्रो वृत्रमहन् तव्ँवृत्रो हतः षोडशभिर् भोगैरसिनात् तस्य वृत्रस्य शीर्षतो गाव उदायन् ता वैदेह्योऽभवन् तासामृषभो जघनेऽनूदैत् तमिन्द्रो ॥ [२५] ॥ ऽचायथ् सोऽमन्यत यो वा इममालभेत मुच्येतास्मात् पाप्मन इति स आग्नेयङ्कृष्णग्रीवमा लभतैन्द्रमृषभन्तस्याग्निरेव स्वेन भागधेयेनोपसृतः षोडशधा वृत्रस्य भोगानप्यदहदैन्द्रेणेन्द्रिय मात्मन्नधत्त यः पाप्मना गृहीतः स्याथ् स आग्नेयङ्कृष्णग्रीवमा लभेतैन्द्रमृषभमग्निरेवास्य स्वेन भागधेयेनोपसृतः ॥ [२६] ॥ पाप्मानमपि दहत्यैन्द्रेणेन्द्रियमात्मन् धत्ते मुच्यते पाप्मनो भवत्येव द्यावापृथिव्यान्धेनुमा लभेत ज्योगपरुद्धोऽनयोर्हि वा एषोऽप्रतिष्ठितोऽथैष ज्योगपरुद्धो द्यावापृथिवी एव स्वेन भागधेयेनोप धावति ते एवैनम्प्रतिष्ठाङ्गमयतः प्रत्येव तिष्ठति पर्यारिणी भवति पर्यारीव ह्येतस्य राष्ट्रय्ँयो ज्योगपरुद्धः समृद्ध्यै वायव्य ॥ [२७] ॥ व्ँवत्समा लभेत वायुर्वा अनयोर् वत्स इमे वा एतस्मै लोका अपशुष्का विडपशुष्काऽथैष ज्योगपरुद्धो वायुमेव स्वेन भागधेयेनोप धावति स एवास्मा इमाँल्लोकान् विशं प्र दापयति प्रास्मा इमे लोकाः स्नुवन्ति भुञ्जत्येनव्ँविडुप तिष्ठते ॥ [२८] ॥

(मद्ध्यन्दिने कद्रुंयमस्यस्पर्द्धमानो वैष्णावरुणीं तमिन्द्रौऽस्य स्वेन भागधेयेनोपसृतो वायव्यंद्विचत्वारिंशच्च) ॥ ४ ॥

---

इन्द्रो वलस्य बिलमपौर्णोथ् स य उत्तमः पशुरासीत् तम्पृष्ठम्प्रति संगृह्योदक्खिदत् तꣳ सहस्रम्पशवोऽनूदायन्थ् स उन्नतोऽभवद्यः पशुकामः स्याथ् स एतमैन्द्रमुन्नतमा लभेतेन्द्रमेव

स्वेन भागधेयेनोप धावति स एवास्मै पशून् प्र यच्छति पशुमानेव भवत्युन्नतो ॥ [२९] ॥
भवति साहस्री वा एषा लख्ष्मी यदुन्नतो लख्ष्मियैव पशूनव रुन्धे यदा सहस्रम्पशून् प्राप्नुयादथ
वैष्णवँव्वामनमा लभेतैतस्मिन् वै तथ् सहस्रमद्ध्यतिष्ठत् तस्मादेष वामनः समीषितः पशुभ्य
एव प्रजातेभ्यः प्रतिष्ठान्दधाति कोऽर्हति सहस्रम्पशून् प्राप्तुमित्याहुरहोरात्राण्येव सहस्रꣳ संपा-
द्याऽऽ*लभेत पशवो ॥ [३०] ॥ वा अहोरात्राणि पशूनेव प्रजातान् प्रतिष्ठाङ्गमयत्योषधीभ्यो
वेहतमा लभेत प्रजाकाम ओषधयो वा एतम्प्रजायै परि बाधन्ते योऽलम्प्रजायै सन् प्रजान्न
विन्दत ओषधयः खलु वा एतस्यै सूतुमपि घ्नन्ति या वेहद्भवत्योषधीरेव स्वेन भागधेयेनोप
धावति ता एवास्मै स्वाद् योनेः प्रजाम्प्र जनयन्ति विन्दते ॥ [३१] ॥ प्रजामापो वा ओषध-
योऽसत् पुरुष आप एवास्मा असतः सद् ददति तस्मादाहुर्यश्चैवँव्वेद यश्च नापस्त्वावासतः सद्
ददतीत्यैन्द्रीꣳ सूतवशामा लभेत भूतिकामोऽजातो वा एष योऽलम्भूत्यै सन् भूतिन्न प्राप्नोती-
न्द्रङ्खलु वा एषा सूत्वा वशाऽभव ॥ [३२] ॥ दिन्द्रमेव स्वेन भागधेयेनोप धावति स एवैनम्भू-
तिङ्गमयति भवत्येव यꣳ सूत्वा वशा स्यात् तमैन्द्रमेवाऽऽ* लभेतैतद्वाव तदिन्द्रियꣳ साख्षा-
देवेन्द्रियमव रुन्ध ऐन्द्राग्नम्पुनरुथ्सृष्टमा लभेत य आ तृतीयात् पुरुषाथ् सोमन्न पिबेद्विच्छिन्नो
वा एतस्य सोमपीथो यो ब्राह्मणः सन्ना ॥ [३३] ॥ तृतीयात् पुरुषाथ् सोमन्न पिबतीन्द्राग्नी
एव स्वेन भागधेयेनोप धावति तावेवास्मै सोमपीथम्प्र यच्छत उपैनꣳ सोमपीथो नमति यदैन्द्रो
भवतीन्द्रियँव्वै सोमपीथ इन्द्रियमेव सोमपीथमव रुन्धे यदाग्नेयो भवत्याग्नेयो वै ब्राह्मणः स्वामेव
देवतामनु सन्तनोति पुनरुथ्सृष्टो भवति पुनरुथ्सृष्ट इव ह्येतस्य ॥ [३४] ॥ सोमपीथः समृद्ध्यै
ब्राह्मणस्पत्यन्तूपरमा लभेताभिचरन् ब्रह्मणस्पतिमेव स्वेन भागधेयेनोप धावति तस्मा एवैनमा
वृश्चति ताजगार्तिमार्च्छति तूपरो भवति ख्षुरपविर् वा एषा लख्ष्मी यत् तूपरः समृद्ध्यै स्फ्यो
यूपो भवति वज्रो वै स्फ्यो वज्रमेवास्मै प्र हरति शरमयम्बर्हिः श्रृणात्येवैनँव्वैभीदक इद्ध्मो
भिनत्त्येवैनम् ॥ [३५] ॥

(भवत्युन्नतः पशवो जनयन्ति विन्दतेऽभवथ् सन्नै तस्ये द्ध्म स्त्रीणि च) ॥ ५ ॥

बार्हस्पत्यꣳ शितिपृष्ठमा लभेत ग्रामकामो यः कामयेत पृष्ठꣳ समानानाꣳ स्यामिति बृहस्पतिमेव स्वेन भागधेयेनोप धावति स एवैनम्पृष्ठꣳ समानानाङ्करोति ग्राम्येव भवति शितिपृष्ठो भवति बार्हस्पत्यो ह्येष देवतया समृद्ध्यै पौष्णꣳ श्याममा लभेतान्नकामोऽन्नव्ँवै पूषा पूषणमेव स्वेन भागधेयेनोप धावति स एवास्मा ॥ [३६] ॥ अन्नम्प्र यच्छत्यन्नाद एव भवति श्यामो भवत्येतद्वा अन्नस्य रूपꣳ समृद्ध्यै मारुतम्पृश्निमा लभेताऽन्नकामोऽन्नव्ँवै मरुतो मरुत एव स्वेन भागधेयेनोप धावति त एवास्मा अन्नम्प्र यच्छन्त्यन्नाद एव भवति पृश्निर् भवत्येतद्वा अन्नस्य रूपꣳ समृद्ध्या ऐन्द्रमरुणमा लभेतेन्द्रियकाम इन्द्रमेव ॥ [३७] ॥ स्वेन भागधेयेनोप धावति स एवास्मिन्निन्द्रियन्दधातीन्द्रियाव्येव भवत्यरुणो भ्रूमान् भवत्येतद्वा इन्द्रस्य रूपꣳ समृद्ध्यै सावित्रमुपद्ध्वस्तमा लभेत सनिकामः सविता वै प्रसवानामीशे सवितारमेव स्वेन भागधेयेनोप धावति स एवास्मै सनिम्प्र सुवति दानकामा अस्मै प्रजा भवन्त्युपद्ध्वस्तो भवति सावित्रो ह्येष ॥ [३८] ॥ देवतया समृद्ध्यै वैश्वदेवम्बहुरूपमा लभेताऽन्नकामो वैश्वदेवव्ँवा अन्नव्ँविश्वानेव देवान्थ्स्वेन भागधेयेनोप धावति त एवास्मा अन्नम्प्र यच्छन्त्यन्नाद एव भवति बहुरूपो भवति बहुरूपꣳ ह्यन्नꣳ समृद्ध्यै वैश्वदेवम्बहुरूपमा लभेत ग्रामकामो वैश्वदेवा वै सजाता विश्वानेव देवान्थ्स्वेन भागधेयेनोप धावति त एवास्मै ॥ [३९] ॥ सजातान् प्र यच्छन्ति ग्राम्येव भवति बहुरूपो भवति बहुदेवत्यो (१) ह्येष समृद्ध्यै प्राजापत्यं तूपरमा लभेत यस्यानाज्ञातमिव ज्योगामयेत् प्राजापत्यो वै पुरुषः प्रजापतिः खलु वै तस्य वेद यस्यानाज्ञातमिव ज्योगामयति प्रजापतिमेव स्वेन भागधेयेनोप धावति स एवैनन्तस्माथ् स्रामान्मुञ्चति तूपरो भवति प्राजापत्यो ह्येष देवतया समृद्ध्यै ॥ [४०] ॥

(त एवास्मै प्राजापत्यो हि त्रीणि च) ॥ ६ ॥

---

वषट्कारो वै गायत्रियै शिरोऽच्छिनत् तस्यै रसः परापतत् तम्बृहस्पतिरुपाऽगृह्णाथ् सा शितिपृष्ठा वशाऽभवद्यो द्वितीयः परापतत् तम्मित्रावरुणावुपागृह्णीताꣳ सा द्विरूपा वशाऽभवद् यस्तृतीयः परापतत् तव्ँविश्वे देवा उपागृह्णन्थ् सा बहुरूपा वशाऽभवद् यश्चतुर्थः परापतथ् स पृथिवीम्प्राऽविशत् तम्बृहस्पतिरभ्य ॥ [४१] ॥ गृह्णादस्त्वेवायम्भोगायेति स उक्षवशः

समभवद्यल्लोहितम्परापतत् तद्रुद्र उपाऽगृह्णाथ् सा रौद्री रोहिणी वशाऽभवद्बार्हस्पत्याꣳ शितिपृष्ठामा लभेत ब्रह्मवर्चसकामो बृहस्पतिमेव स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवति छन्दसाँव्वा एष रसो यद्वशा रस इव खलु ॥ [४२] ॥ वै ब्रह्मवर्चसञ्छन्दसामेव रसेन रसम्ब्रह्मवर्चसमव रुन्धे मैत्रावरुणीन्द्विरूपामा लभेत वृष्टिकामो मैत्रँव्वा अहर् वारुणी रात्रिरहोरात्राभ्याङ्खलु वै पर्जन्यो वर्षति मित्रावरुणावेव स्वेन भागधेयेनोप धावति तावेवास्मा अहोरात्राभ्याम्पर्जन्यँव्वर्षयत श्छन्दसाँव्वा एष रसो यद्वशा रस इव खलु वै वृष्टि श्छन्दसामेव रसेन ॥ [४३] ॥ रसँव्वृष्टिमव रुन्धे मैत्रावरुणीन्द्विरूपामा लभेत प्रजाकामो मैत्रँव्वा अहर् वारुणी रात्रि रहोरात्राभ्याङ्खलु वै प्रजाः प्र जायन्ते मित्रावरुणावेव स्वेन भागधेयेनोप धावति तावेवास्मा अहोरात्राभ्याम्प्रजाम्प्र जनयत श्छन्दसाँव्वा एष रसो यद्वशा रस इव खलु वै प्रजा छन्दसामेव रसेन रसम्प्रजामव ॥ [४४] ॥ रुन्धे वैश्वदेवीम्बहुरूपामा लभेतान्नकामो वैश्वदेवँव्वा अन्नँव्विश्वानेव देवान्थ् स्वेन भागधेयेनोप धावति त एवास्मा अन्नम्प्र यच्छन्त्यन्नाद एव भवति छन्दसाँव्वा एष रसो यद्वशा रस इव खलु वा अन्नञ्छन्दसामेव रसेन रसमन्नमव रुन्धे वैश्वदेवीम्बहुरूपामा लभेत ग्रामकामो वैश्वदेवा वै ॥ [४५] ॥ सजाता विश्वानेव देवान्थ् स्वेन भागधेयेनोप धावति त एवास्मै सजातान् प्र यच्छन्ति ग्राम्येव भवति छन्दसाँव्वा एष रसो यद्वशा रस इव खलु वै सजाता श्छन्दसामेव रसेन रसꣳ सजातानव रुन्धे बार्हस्पत्यमुख्षवशमा लभेत ब्रह्मवर्चसकामो बृहस्पतिमेव स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसं ॥ [४६] ॥ दधाति ब्रह्मवर्चस्येव भवति वशँव्वा एष चरति यदुख्षा वश इव खलु वै ब्रह्मवर्चसँव्वशेनैव वशम्ब्रह्मवर्चसमव रुन्धे रौद्रीꣳ रोहिणीमा लभेताभिचरन् रुद्रमेव स्वेन भागधेयेनोप धावति तस्मा एवैनमा वृश्चति ताजगार्तिमार्च्छति रोहिणी भवति रौद्री ह्येषा देवतया समृद्ध्यै स्फ्यो यूपो भवति वज्रो वै स्फ्यो वज्रमेवास्मै प्र हरति शरमयम्बर्हिः श्रृणात्येवैनं वैभीदक इद्ध्मो भिनत्त्येवैनम् ॥ [४७] ॥

(एकान्नविꣳशतिश्च) ॥ ७ ॥

असावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्मा एताꣳ सौरीꣴ श्वेताव्ँव्शामाऽलभन्त तयैवास्मिन् रुचमदधुर्यो ब्रह्मवर्चसकामः स्यात् तस्मा एताꣳ सौरीꣴ श्वेताव्ँव्शामा लभेतामुमेवाऽऽदित्यꣴ स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसन्दधाति ब्रह्मवर्चस्येव भवति बैल्वो यूपो भवत्यसौ ॥ [४८] ॥ वा आदित्यो यतोऽजायत ततो बिल्व उदतिष्ठथ् सयोन्येव ब्रह्मवर्चसमव रुन्धे ब्राह्मणस्पत्याम्बभ्रुकर्णीमा लभेताभिचरन् वारुणन्दशकपालम्पुरस्तान् निर्वपेद् वरुणेनैव भ्रातृव्यं ग्राहयित्वा ब्रह्मणा स्तृणुते बभ्रुकर्णी भवत्येतद्वै ब्रह्मणो रूपꣳ समृद्ध्यै स्फ्यो यूपो भवति वज्रो वै स्फ्यो वज्रमेवास्मै प्र हरति शरमयम्बर्हिः शृणा ॥ [४९] ॥ त्येवैनव्ँवैभीदक इद्ध्मो भिनत्त्येवैनव्ँवैष्णवव्ँवामनमा लभेत यय्ँयज्ञो नोपनमेद्विष्णुर् वै यज्ञो विष्णुमेव स्वेन भागधेयेनोप धावति स एवास्मै यज्ञम्प्र यच्छत्युपैनय्ँयज्ञो नमति वामनो भवति वैष्णवो ह्येष देवतया समृद्ध्यै त्वाष्ट्रव्ँवडबमा लभेत पशुकामस्त्वष्टा वै पशूनाम्मिथुनानाꣳ ॥ [५०] ॥ प्रजनयिता त्वष्टारमेव स्वेन भागधेयेनोप धावति स एवास्मै पशून् मिथुनान् प्र जनयति प्रजा हि वा एतस्मिन् पशवः प्रविष्टा अथैष पुमान्थ् सन् वडबः साक्षादेव प्रजाम्पशूनव रुन्धे मैत्रꣴ श्वेतमा लभेत संग्रामे सय्ँयत्ते समयकामो मित्रमेव स्वेन भागधेयेनोप धावति स एवैनम्मित्रेण सन्नयति ॥ [५१] ॥ विशालो भवति व्यवसाययत्येवैनम्प्राजापत्यङ्कृष्णमा लभेत वृष्टिकामः प्रजापतिर् वै वृष्ट्या ईशे प्रजापतिमेव स्वेन भागधेयेनोप धावति स एवास्मै पर्जन्यव्ँवर्षयति कृष्णो भवत्येतद्वै वृष्ट्यै रूपꣳ रूपेणैव वृष्टिमव रुन्धे शबलो भवति विद्युतमेवास्मै जनयित्वा वर्षयत्यवाश्रृङ्गो भवति वृष्टिमेवास्मै नि यच्छति ॥ [५२] ॥

(असौ शृणाति मिथुनानाꣳ नयति यच्छति) ॥ ८ ॥

---

वरुणꣳ सुषुवाणमन्नाद्यन्नोपानमथ् स एताव्ँवारुणीङ्कृष्णाव्ँवशामपश्यत् ताꣴ स्वायै देवताया आऽलभत ततो वै तमन्नाद्यमुपानमद्यमलमन्नाद्याय सन्तमन्नाद्यन्नोपनमेथ् स एताव्ँवारुणीङ्कृष्णाव्ँवशामा लभेत वरुणमेव स्वेन भागधेयेनोप धावति स एवास्मा अन्नम्प्र यच्छत्यन्नाद ॥ [५३] ॥ एव भवति कृष्णा भवति वारुणी ह्येषा देवतया समृद्ध्यै मैत्रꣴ श्वेतमा लभेत वारुणङ्कृष्णमपाञ्चौषधीनाञ्च सन्धावन्नकामो मैत्रीर् वा ओषधयो वारुणीरापोऽपाञ्च खलु

वा ओष॑धीनाञ्च॒ रस॒मुप॑ जीवामो मि॒त्रावरु॑णावे॒व स्वेन॑ भाग॒धेये॒नोप॑ धावति॒ तावे॒वास्मा॒ अन्नं॒ प्र य॑च्छतोऽन्ना॒द ए॒व भ॑व ॥ [५४] ॥ त्य॒पाञ्चौष॑धीनाञ्च स॒न्धावा ल॑भत उ॒भय॒स्यावरु॑द्ध्यै॒ विशा॑खो॒ यूपो॑ भवति॒ द्वे ह्ये॑ते दे॒वते॒ समृ॑द्ध्यै मै॒त्रꣳ श्वे॒तमा ल॑भेत वा॒रु॒णङ्कृ॒ष्णञ्ज्योगा॑मयावी॒ यन् मै॒त्रो भव॑ति मि॒त्रे॒णै॒वास्मै॒ वरु॑णꣳ शमयति॒ यद्वा॑रु॒णः सा॒ख्षादे॒वैन॑ँव्वँरुणपा॒शान् मु॑ञ्चत्यु॒त यदी॒तासु॒र् भव॑ति॒ जीव॑त्ये॒व दे॒वा वै पुष्टि॒न्नावि॑न्द॒न् ॥ [५५] ॥ ताम्मि॑थु॒नेऽ॑पश्य॒न् तस्या॒न्न सम॑राध॒यन् ता॒व॒श्विना॑वब्रूता॒मा॒व॒यो॒र् वा ए॒षामै॒तस्याँ᳚व्वँदद्ध्व॒मिति॒ साऽश्विनो॒रे॒वाभ॑व॒द् यः पुष्टि॑काम॒ः स्याथ् स ए॒तामा᳚श्वि॒नीय्यँ॒मीव्वँ॒शामा ल॑भेता॒ऽश्विना॑वे॒व स्वेन॑ भाग॒धेये॒नोप॑ धावति॒ तावे॒वास्मि॒न् पुष्टि॑न्धत्त॒ः पुष्य॑ति प्र॒जया॑ प॒शुभि॑ः ॥ [५६] ॥

(अ॒न्ना॒दौ᳚ ऽन्ना॒द ए॒व भ॑वत्य विन्द॒न् पञ्च॑चत्वारिꣳशच्च) ॥ ९ ॥

आ॒श्वि॒नन्धू॒म्रल॑ला॒ममा ल॑भे॒त यो दुर्ब्रा᳚ह्म॒णः सोम॒म्पिपा॑सेद॒श्विनौ॒ वै दे॒वाना॒मसो॑मपावास्ता॒न्तौ प॒श्वा सोम॑पी॒थम्प्राप्नु॑ता॒मश्विना॑वे॒तस्य॑ दे॒वता॒ यो दुर्ब्रा᳚ह्म॒णः सोम॒म्पिपा॑सत्य॒श्विना॑वे॒व स्वेन॑ भाग॒धेये॒नोप॑ धावति॒ तावे॒वास्मै॑ सोमपी॒थम्प्र य॑च्छत॒ उपै॑नꣳ सोमपी॒थो न॑मति॒ यद्धू॒म्रो भव॑ति धूम्रि॒माण॑मे॒वास्मा॒दप॑ हन्ति ल॒लामो॑ ॥ [५७] ॥ भवति मुख॒त ए॒वास्मि॒न् तेजो॑ दधाति वा॒यव्य॑ङ्गोमृ॒गमा ल॑भे॒त यमज॑घ्निवाꣳसमभि॒शꣳसे॑यु॒रपू॑ता॒ वा ए॒तव्वँ॒ागृ॑च्छति॒ यमज॑घ्निवाꣳसमभि॒शꣳस॑न्ति॒ नैष ग्रा॒म्यः प॒शुर् नार॒ण्यो यद्गो॑मृ॒गो नेवै॒ष ग्रामे॒ नार॑ण्ये॒ यमज॑घ्निवाꣳसमभि॒शꣳस॑न्ति वा॒युर् वै दे॒वाना᳚म्प॒वित्र॑व्वाँ॒युमे॒व स्वेन॑ भाग॒धेये॒नोप॑ धावति॒ स ए॒वै ॥ [५८] ॥ न॑म्पवयति॒ परा॑ची॒ वा ए॒तस्मै᳚ व्यु॒च्छन्ती॒ व्यु॑च्छति॒ तम॑ः पा॒प्मा॒नम्प्र वि॑शति॒ यस्या᳚श्वि॒ने श॒स्यमा॑ने॒ सूर्यो॒ ना*ऽऽविर् भव॑ति सौ॒र्यम्ब॑हु॒रू॒पमा ल॑भेता॒मुमे॒वादि॒त्यꣳ स्वेन॑ भाग॒धेये॒नोप॑ धावति॒ स ए॒वास्मा॒त् तम॑ः पा॒प्मा॒नमप॑ हन्ति प्र॒तीच्य॑स्मै व्यु॒च्छन्ती॒ व्यु॑च्छ॒त्यप॒ तम॑ः पा॒प्मान॑ꣳ हते ॥ [५९] ॥

(ल॒लाम॒ः स ए॒व षट्च॑त्वारिꣳशच्च) ॥ १० ॥

इन्द्र॑व्वँो वि॒श्वत॒स्परी >१, न्द्र॒न्नरो॒ >२, मरु॑तो॒ यद्ध॑ वो दि॒वो >३, या व॒ः शर्म॑ >४॥ भरे॒ष्विन्द्र॑ꣳ सु॒हव॑ꣳ हवामहेऽꣳहो॒मुच॑ꣳ सु॒कृत॒न्दैव्य॒ञ्जन᳚म्। अ॒ग्निम्मि॒त्रव्वँरु॑णꣳ सा॒तये॒ भग॒न्द्यावा॑पृथि॒वी

मरुतः स्वस्तये॥ ममत्तु नः परिज्मा वसर्हा ममत्तु वातो अपाँवृषण्वान्। शिशीतमिन्द्रापर्वता युवन्नस्तन्नो विश्वे वरिवस्यन्तु देवाः॥ प्रिया वो नाम ॥ [६०] ॥ हुवे तुराणाम्। आ यत् तृपन्मरुतो वावशानाः॥ श्रियसे कम्भानुभिः सम्मिमिक्षिरे ते रश्मिभिस्त ऋक्वभिः सुखादयः। ते वाशीमन्त इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः॥ अग्निः प्रथमो वसुभिर्नो अव्यात् सोमो रुद्रेभिरभि रक्षतु त्मना। इन्द्रो मरुद्भिर्ऋतुधा कृणोत्वादित्यैर् नो वरुणः सꣳ शिशातु॥ सन्नो देवो वसुभिरग्निः सꣳ ॥ [६१] ॥ सोमस्तनूभी रुद्रियाभिः। समिन्द्रो मरुद्भिर् यज्ञियैः समादित्यैर् नो वरुणो अजिज्ञिपत्॥ यथाऽऽदित्या वसुभिः संबभूवुर् मरुद्भी रुद्राः समजानताभि। एवा त्रिणामन्नहृणीयमाना विश्वे देवाः समनसो भवन्तु॥ कुत्रा चिद्यस्य समृतौ रण्वा नरो नृषदने। अर्हन्तश्चिद्यमिन्धते सञ्जनयन्ति जन्तवः॥ सय्ँयदिषो वनामहे सꣳ हव्या मानुषाणाम्। उत द्युम्नस्य शवस ॥ [६२] ॥ ऋतस्य रश्मिमा ददे॥ यज्ञो देवानाम्प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः। आ वोऽर्वाची सुमतिर् ववृत्यादꣳहोश्चिद्या वरिवोवित्तराऽसत्॥ शुचिरपः सूयवसा अदब्ध उप क्षेति वृद्धवयाः सुवीरः। नकिष्टं(२) घ्नन्त्यन्तितो न दूराद्य आदित्यानाम्भवति प्रणीतौ॥ धारयन्त आदित्यासो जगथ् स्था देवा विश्वस्य भुवनस्य गोपाः। दीर्घाधियो रक्षमाणा ॥ [६३] ॥ असुर्यमृतावानश्चयमाना ऋणानि॥ तिस्रो भूमीर् धारयन् त्रीꣳ रुत द्यून् त्रीणि व्रता विदथे अन्तरेषाम्। ऋतेनाऽऽ*दित्या महि वो महित्वन्तदर्यमन् वरुण मित्र चारु॥ त्यान्नु क्षत्रियाꣳ अव आदित्यान् याचिषामहे। सुमृडीकाꣳ अभिष्टये॥ न दक्षिणा वि चिकिते न सव्या न प्राचीनमादित्या नोत पश्चा। पाक्या चिद्वसवो धीर्या चिद् ॥ [६४] ॥ युष्मानीतो अभयञ्ज्योतिरश्याम्॥ आदित्यानामवसा नूतनेन सक्षीमहि शर्मणा शन्तमेन। अनागास्त्वे अदितित्वे तुरास इमय्ँयज्ञन्दधतु श्रोषमाणाः॥ इमम्मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युरा चके॥ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः॥ अहेडमानो वरुणेह बोद्ध्युरुशꣳस मा न आयुः प्र मोषीः ॥ [६५] ॥

(नामा ऽग्निः सꣳ शवसो रक्षमाणा धीर्या चिदे कान्न पञ्चाशच्च) ॥ ११ ॥

## समाप्ति कोर्वैः

(वा॒य॒व्यं॑ प्र॒जाप॑ति॒स्ता वरु॑णं देवासु॒रा ए॒ष्व॑ सावा॑दि॒त्यो दशा॑र्॒षभा॒मिन्द्रो॑ व॒लस्य॑ बार्॒हस्प॒त्यं व॑षट्का॒रो॑ ऽसौ सौ॒रीं वरु॑ण मा॒श्विन मिन्द्र॑व्वँो॒ नर॒ एका॑दश)

(वा॒य॒व्यं॑ मा॒ग्ने॒यी॑ङ्कृष्णग्री॒वी म॒सावा॑दि॒त्यो वा अ॑हो॒रात्राणि॑ वषट्का॒रः प्र॑जन॑यि॒ता हु॑वे तु॒राणां॒॑ पञ्च॑षष्टिः)

(वा॒य॒व्यं॑ प्रमो॑षीः)

॥ हरिः ॐ ॥

## द्वितीयकाण्डे प्रथमः प्रश्नः समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| ११ | ६५ |

ॐ